हरिद्रापार्थिवपूजा

हरिद्रा॰
॥१॥

॥श्रीगणेशायनमः॥ अथ हरिद्रापार्थिवपूजा लिख्यते॥ आचम्य प्राणानायम्य देश कालौ स्मृत्वा॥ मम वंशपरंपरायां मम लक्ष्मीप्राप्त्यर्थं निखिलमनोरथसिद्ध्यर्थं श्रीभवानीशंकरप्रीत्यर्थं हरिद्रापार्थिवपूजनमहं करिष्ये॥ तदादौ पंचोपचारैर्गणपतिं संपूज्य॥ ततो कलशं स्थापयेत्॥ ॐ भूर्भुवः॥ कलशस्य मुखे विष्णुः कंठे रुद्र समाश्रितः॥ मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणास्थिताः॥ कुक्षौ तु सागराः सप्त सप्त द्वीपा वसुंधरा॥ ऋग्वेदोथ यजुर्वेदः सामवेदोथर्वणः॥ अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः॥ अत्र गायत्री सावित्री शांति पुष्टिकरि तथा॥ आयांतु शिव पूजार्थं दुरितक्षयकारकाः॥ सर्वे समुद्रा सरित स्तीर्थानि जलदा नदाः॥ आयांतु शिव पूजार्थं दुरितक्षयकारकाः॥ कलशं संस्थाप्य॥ पूजामारभेत्॥ हरायनमः हरिद्रागोलाहरणं॥ महेश्वरायनमः संघट्टनं मूलपाणयेनमः प्रतिष्ठापनं॥ पिनाकपाणयेनमः आवाहनं॥ सदाशिवायनमः ध्यानं॥ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतं

रम
॥२॥

संरत्नाकल्पोज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं॥ पद्मासीनं समंतात्स्तुतिममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रं॥१॥ शिवायनमः आसनं समर्पयामि ० पाद्यं॰ अर्घ्यं॰ आचमनीयं॰ स्नानं॰ पंचामृतस्नानं॰ शुद्धोदकस्नानं॰ वस्त्रं॰ यज्ञोपवीतं॰ गंधं॰ अक्षतान्॰ पुष्पाणि॰ अत्रैव अष्टोत्तरशतनामभिः प्रणवादिचतुर्थ्यंतैः पुष्पाणि दत्वा॰ धूपं॰ दीपं॰ नैवेद्यं॰ फलं॰ तांबूलं॰ दक्षिणांतं कृत्वा॥ शर्वायक्षितिमूर्तयेनमः॥ भवायजलमूर्तये॰॥ रुद्रायाग्निमूर्तये॰ उग्रायवायुमूर्तयेनमः॥ भीमायआकाशमूर्तयेनमः॥ पशुपतयेयजमानमूर्तयेनमः॥ महादेवायसोममूर्तयेनमः॥ ईशानायसूर्यमूर्तयेनमः॥ आहोदिग्बंधनं॥ इंद्रायनमः॥ अग्नयेनमः॥ यमायनमः॥ निर्ऋतयेनमः॥ वरुणायनमः॥ वायवेनमः॥ कुबेरायनमः॥ ईशानायनमः॥ ऊर्ध्वब्रह्मणेनमः॥ अधः अनंतायनमः॥ ततो वज्रायनमः॥ शक्तयेनमः॥ दंडायनमः॥ खड्गायनमः॥ पाशायनमः॥ अंकुशायनमः॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

गदायै नमः ॥ त्रिशूलायनमः ॥ पद्मायनमः ॥ चक्रायनमः ॥ अक्षतान्पुष्पे वाद्यादिकं पूजयेत् ॥ ततो नीराजनं दीपं पुष्पांजलिं च दद्यात् ॥ हरो महेश्वर शंभो स्वशूलपाणि पिनाकधृक् ॥ शिवः पशुपतिस्त्र्येव महादेवेति विसर्जने ॥ अनेन यथामिलितोपचारैः शिवपूजनेन तेन श्रीभवानीशंकरौ प्रीयतां ॥ ॥ इति हरिहरपार्थिवपूजा समाप्ता ॥ शुभंभवतु ॥ संवत् १८२४ चैत्रशुध ५ शुक्रवासरे पा० ईश्वररामजी ने लिखितं ॥ काशीविश्वेश्वराय ॥ अथशिवपूजनेपुष्पाणि ॥ बाहेतं · कांचिकारं · करवीरं · तिलपुष्पं · विल्वपत्रं · कल्हारं · अर्कपुष्पं · मंदारपुष्पं · नीलोत्पले · रक्तोत्पले · कमलपुष्पं · मालतीपुष्पं · चंपकपुष्पं · नागरपुष्पं · धत्तूरपुष्पं · छातपत्रपुष्पं · सेवीरपुष्पं · अगस्तिपुष्पं जातिपुष्पं · पाटलपुष्पं · पुन्नागपुष्पं · अशोकपुष्पं · कदंबपुष्पं · पलाशपुष्पं · कुंदपुष्पंच प्रशस्तं शिवपूजनेन ॥ इतिपुष्पाणि ॥ अथमहादेवस्याष्टोत्तरनामानि ॐ शिवायनमः १ महेश्वरायनमः २ शंभवेनमः ३ पिनाकिनेनमः ४ शशिशेखरायनमः ५ वामदेवायनमः ६ विरूपाक्षा राम- ॥२॥

य · ७ कपर्दिने · ८ नीललोहिताय · ९ शंकराय · १० शूलपाणये · ११ खट्वांगिने · १२ विष्णुवल्लभाय · १३ सोपि विष्टाय · १४ अंबीकानाथाय · १५ श्रीकंठाय · १६ भक्तवत्सलाय · १७ भवाय · १८ सर्वाय · १९ त्रिलोकेशाय · २० शितिकंठाय · २१ शिवाप्रियाय · २२ उग्राय · २३ कपालिने · २४ कामारये · २५ अंधकासुरसूदनाय · २६ गंगाधराय · २७ ललाटाक्षाय · २८ कालाय · २९ कालकालाय · ३० कृपानिधये · ३१ भीमाय · ३२ परशुहस्ताय · ३३ मृगपाणये · ३४ जटाधराय · ३५ कैलासवासिने · ३६ कवचिने · ३७ कठोरवे · ३८ त्रिपुरांतकाय · ३९ वृषांकाय · ४० वृषभारूढाय · ४१ भस्मोद्धूलितविग्रहाय · ४२ सामप्रियाय · ४३ स्वरमयाय · ४४ त्रयीमूर्तये · ४५ अनीश्वराय · ४६ सर्वज्ञाय · ४७ परमात्मने · ४८ सोमसूर्याग्निलोचनाय · ४९ हविर्यज्ञमयाय · ५० सोमाय · ५१ पंचवक्त्राय · ५२ सदाशिवाय · ५३ विश्वेश्वराय · ५४ वीरभद्राय · ५५ गणनाथाय · ५६ प्रजापतये · ५७ हिरण्यरेतसे · ५८ दुर्धर्षाय · ५९ गिरीशाय · ६० गिरिशाय · ६१ अनघाय · ६२ भुजंगभूषणाय · ६३ भर्गाय · ६४ गिरिधन

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

नमः॰ ६४ गिरिप्रियाय॰ ६५ कृत्तिवाससे॰ ६६ पुरारातये॰ ६७ भगवते॰ ६८ प्रमथाधिपाय॰
६९ मृत्युंजयाय॰ ७० सूक्ष्मतनवे॰ ७१ जगद्व्यापिने॰ ७२ जगद्गुरवे॰ ७३ व्योमकेशाय॰ ७४
महासेनाय॰ ७५ जनकाय॰ ७६ चारुविक्रमाय॰ ७७ रुद्राय॰ ७८ भूतपतये॰ ७९ स्थाणवे
नमः॰ ८० अहिर्बुध्न्याय॰ ८१ दिगंबराय॰ ८२ अष्टमूर्तये नमः॰ ८३ अनेकात्मने॰ ८४ सात्विकाय॰ ८५ शुद्धविग्रहाय॰ ८६ शाश्वताय॰ ८७ खंडपरशवे॰ ८८ अजाय॰ ८९ पाशविमोचनाय॰ ९० मृडाय॰ ९१ पशुपतये॰ ९२ देवाय॰ ९३ महादेवाय॰ ९४ अव्ययाय॰ ९५
हराय॰ ९६ पुष्यदंताय॰ ९७ मिढेनमः॰ ९८ अव्यग्राय॰ ९९ दक्षाध्वरहराय॰ १०० भग
नेत्रभिदे॰ १०१ अव्यक्ताय॰ १०२ सहस्राक्षाय॰ १०३ सहस्रपादे॰ १०४ अपवर्गप्रदाय॰
१०५ अनंताय॰ १०६ तारकाय॰ १०७ परमेश्वराय॰ १०८ ॥ इतिमहादेव अष्टोत्तर
नामसमाप्तम्॥ सं १८२४ चैत्रवद्य षष्ठी६ भृगुवासरे का सीकरपा ईश्वरामजी राम॰
पढीजेही सोमारहीनताईबछावैतीस उपरांत घयावैं घेवू ताई नेलिखितं शुभंभवतु॥ १८३॥